स्रीलकष्टता” इत्यादिना सा०द०उक्ते काव्ये प्रकृतार्थापो-षणाकारित्वरूपे अर्थदोषभेदे। यथा “विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये!” इत्यत्र विततशब्दो मान-त्यागं प्रति न किञ्चिदुपकुरुते इति तस्य तत्पोषणानुपकारि-त्वात्तथात्वम् अपुष्टस्य भावः त्व। अपुष्टत्वमप्यत्र न०। ‘अपुष्टत्वं मुख्यानुपकारित्वमिति” सा०द०।

**अपुष्प** अव्य० पुष्पस्याभावः अव्ययी०। पुष्पाभावे। “तैरपुष्पात् वनस्पति”रित्यमरः अपुष्पादित्यत्र पञ्चम्या नाम्भावः।

**अपुष्पफलद** पु० अपुष्पं पुष्पाभावेऽपि फलं ददाति दा—क। १ पुष्पं विना फलदे पनसे तथाभूते उदुम्बरादौ च। उपचारात् २ अहेतुकफलदातरि कर्त्तरि त्रि०।

**अपूजा** स्त्री अभावादौ न०त०। १ पूजाभावे २ आदराभावे ३ सम्मानाभावे ४ कुत्सितपूजायाम् ५ अविधानेनार्चने च।

**अपूजित** त्रि०न०त०। १ पूजितभिन्ने २ अनादृते ३ अवज्ञाते च

**अपूत** त्रि० न०त०। १ पवित्रभिन्ने २ अशुचौ “अपूतो वा एषोऽमेध्यो यदश्वः” इति शत०ब्रा० “यज्ञापूत इव मन्येत” कात्या० २२,४,२९। ३ संस्कारहीने व्रात्ये च “एतैरपूतैर्विधिवदापद्यपि च कर्हिचिदिति” मनुः।

**अपूप** पु०न पूयते विशीर्य्यते पू—प न०त०। १ गोधूमादिचूर्ण-पिष्टके २ पुरोडाशे हविर्भेदे “अपूपं देव घृतवन्तमग्ने” ऋ० १०,४५,९।“अपूपं पुरोडाशमिति” भा०।“कृशरसंयावं पायसापूपमेव चेति” मनुः। प्राचुर्य्ये मयट्। अपूपमयं पर्व अपूपमयो यज्ञः। अपूपाय हितम् “विभाषा हविरपूपादिभ्यः” पा०यत्। अपूप्यम् ‘छ च” पा० अपू-पीयं च पिष्टकहिते यवगोधूमचूर्णादौ। तत् पण्यमस्य ठक्। आपूपिकः। अपूपविक्रेतरि त्रि०।

**अपूपादि** पु० ६ब०। पाणिन्युक्ते हितार्थे यतोः प्रकृति भूते शब्दसमूहे। स च गणः “अपूप तण्डुल, अभ्यूष, अभ्योष, अवोष, अभ्येष, पृथुक, ओदन, सूप, पूप, किण्व, प्रदीप, मुसल, कटक, कर्णवेष्टक।

**अपूपाष्टका** स्त्री अपूपसाधनाष्टका। पौष्या ऊर्द्ध्वं १ कृष्णा-ष्टम्यां २ तत्र विहिते श्राद्धे च।

**अपूरणी** स्त्री न पूर्य्यते सर्वतः कण्टकाष्टततया दुरारोह-त्वात् पूर—कर्म्मणि ल्युट् ङीप् न०त०। शाल्मलिवृक्षे। करणे ल्युट्। संख्यापूरणसाधनार्थकप्रत्ययभिन्ने च।

**अपूर्ण** त्रि० न पूर्णम्। ऊने। ‘अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामिति” रघुः। भावे क्त। पूरणाभावे ‘सार-तण्डुलमपूर्णं अर्पयित्वेति” का० ४,१,५,७, अपूर्णं यथा स्यात्तेन चरुणा स्थाल्याः पूरणं न भवतीति तथा अर्पयित्वेति” तद्व्या०। [पूरणं तुल्यं तत्कालाप्राप्ते।

**अपूर्णकाल** त्रि० न पूर्णः कालोयस्य। यस्य यत्काले

**अपूर्व्व** त्रि० न पूर्व्वं दृष्टम्। १ अविदिते २ आश्चर्य्ये “अध-नुषि शरजालं मर्म्मभेदानुकारि त्रितयमिदमपूर्व्वं दृष्टमन्तःपुरे ते” इति ‘अपूर्व्वो दृश्यते वह्निः कामिन्याः स्तनमण्डले। दूरतोदहतीवाङ्गं हृदि लग्नस्तु शीतल” इति च उद्भटः। पूर्व्वः पूर्व्ववर्त्ती न०ब०। ३ हेतुशून्ये त्रि०। न०त०। ४ पूर्व्वकालादिभिन्ने त्रि०। पूर्व्वशब्दस्य दिग्देशकालवाचित्वे सर्वनामतया ततो नञ्तत्-पुरुषेऽपि अस्य सर्वनामता तेन तत्कार्य्यम् अपूर्व्वे अपू-र्व्वस्मै ङिङसोस्तु वा स्मौ पुंवद्भावश्च “कौमारापूर्व्व-वचने” इति पा०५ परब्रह्मणि पु०। “तदेतद् ब्रह्मापूर्व्वमन-परमनन्तरमपारमबाह्यमिति” शत०ब्रा०। ६प्रमाणान्तरा-प्राप्ते “उपक्रमोपसंहाराबभ्यासोऽपूर्व्वता फलमिति” वेदा० सा० ७वैधनिषिद्धक्रियाजन्ययोः कालान्तरभाविनोः सुखदुः-खयोर्हेतुभूतयोः पुण्यपापयोः न०। अदृष्टसिद्धिवत् अपूर्व्व-सिद्धिरनेया। सा च ११७ पृष्ठे दृश्या। स्वर्गकामोयजेतत्यादौ लिङा हि यागादौ इष्टसाधनत्वं बोध्यते इति नैयायिकाः कार्य्यत्वेनापूर्व्वं बोध्यते इति प्राभाकरामन्यन्ते। तत्रोभय-मतेऽपि, आशुविनाशिनः कालान्तरभाविफलजनकत्वे फलसमयपर्य्यन्तस्थायिव्यापारजनकत्वं प्रयोजकमिति तथा हि अव्यवहितपूर्व्वस्थायिन एव कारणत्वेन यागस्य कालान्तरभाविस्वर्गस्य च मध्ये व्यापाररूपमपूर्व्वं प्रकल्प्यते साक्षादसाधनस्य यागस्य स्वर्गसाधनता व्यापारमन्तरेणानु-पपद्यमाना स्वर्गनिर्वाहकं व्यापारमपूर्व्वं कल्पयतीति। तच्चा-पूर्व्वं किंनिष्ठं कथं वा तस्यैव व्यापारत्वमित्याशङ्क्य शब्दचिन्तामणौ निर्णीतं यथा “तथापि ध्वंस एव व्यापारोऽस्तु तत्र सद्भावनिरूपकस्यापि कारणत्वात् तस्यानन्तत्वेऽपि स्वभावात् सावधेः फलजनकत्वम्। यत्र ध्वंसोहेतुस्तत्र तत्प्रागभावोऽपीति चेत् न दुःख-ध्वंसजन्यदृष्टि, मिथ्याधीध्वंससाध्यमुक्तौ च व्यभिचारात्। प्रतिबन्धकाभावत्वेन हेतुत्वे, तथाभावाच्च ध्वंसेनानुपपत्तिः कथं तेनैव समाधातव्येति चेन्न ध्वंसे सति तद्व्यापारत्व-ज्ञानं विनानुपपत्तेस्तद्व्यापारत्वकल्पनया शान्तेरिति मैवं प्रतियोगिध्वंसयोरेकत्वाजनकत्वात् न हि नियमतोध्वंसे सति यद्भवति तत्तत्र कारणम् न च संसर्गाभावत्वेन हेतुत्वे तथेति वाच्यं व्यभिचाराभावेन तस्यापि प्रयोजकत्वात्।